# वैयाकरणसिद्धान्तकौमुदी

## हलन्तपुंलिङ्गप्रकरणम् (३२)

१०.०१.२०१२

- सकारान्तः पुंलिङ्गः ‘सेदिवस्’ शब्दः ।
- षद्लृ विशरणगत्यवसादनेषु
- सद् लिट्
- सद् (क्वसु) वस्  (‘भाषायां सदवसश्रुवः’ - ३.२.१०८)
- सद् सद्   वस्          (‘लिटि धातोरनभ्यासस्य’ - ६.१.८)

- स सद् वस्  ('हलादिः शेषः' - ७.४.६०)
- सेद्   वस्  ('अत एकहल्मध्येऽनादेशादेर्लिटि' - ६.४.१२०)
- सेदिवस्   ('वस्वेकाजाद्घसाम्' - ७.२.६७ - इति इडागमः)

- सेदिवस्  स्
- सेदिवन् स् स्  ('उगिदचां...' - ७.१.७०)
- सेदिवान् स् स् ('सान्तमहतः...' - ६.४.१०)
- सेदिवान् स्   ('हल्ङ्याब्भ्यः...' - ६.१.६८)
- सेदिवान्   ('संयोगान्तस्य लोपः' - ८.२.२३)

- सेदिवांसौ, सेदिवांसः ।
- सेदिवांसम्, सेदिवांसौ ।

- सेद् वस् (शस्) अस्
  - अन्तरङ्गोऽपि इडागमः सम्प्रसारणविषये न प्रवर्तते, ‘अकृतव्यूहाः’ इति परिभाषया ।
- सेद् उ अस् अस् (‘वसोः सम्प्रसारणम्’ - ६.४.१३१)
- सेद् उस् अस् (‘सम्प्रसारणाच्च’ - ६.१.१०८)
- सेदुषस् (‘आदेशप्रत्यययोः’ - ८.३.५९)
- सेदुषः

- सेदुषा, सेदिवद्भ्याम् इत्यादि ।

- सकारान्तः पुंलिङ्गः 'सुहिंस्' शब्दः ।
- सुहिंस् स्
- सुहिंस् ('हल्ङ्याब्भ्यः...' - ६.१.६८)
- 'सान्तमहतः संयोगस्य' इत्यत्र सान्तसंयोगोऽपि प्रातिपदिकस्यैव गृह्यते, न तु धातोः, महच्छब्दसाहचर्यात् ।
- सुहिन् ('संयोगान्तस्य लोपः' - ८.२.२३)
- सुष्ठु हिनस्तीति सुहिन्, सुहिंसौ, सुहिंसः ।

- सुहिन्भ्याम् इत्यादि ।
- सुहिन्त्सु/सुहिन्सु ।
- ‘नश्च’ (८.३.३०) इति वा धुडागमः ।

- स्रंसु ध्वंसु अवस्रंसने, ध्वंसु गतौ च ।
- ध्वंस्   (क्विप्)  व्
- ध्वस्   व्    ('अनिदितां हल उपधायाः क्ङिति' - ६.४.२४)
- ध्वस्    ('वेरपृक्तस्य' - ६.१.६७)

- ध्वस्  (सुँ) स्
- ध्वस्    ('हल्ङ्याब्भ्यः..' - ६.१.६८)
- ध्वद्    ('वसुस्रंसुध्वंस्वनडुहां दः' - ८.२.७२)
- ध्वत्    ('वाऽवसाने' - ८.४.५६)

- ध्वसौ, ध्वसः ।
- ध्वद्भ्याम् ।
- एवं स्रत् ।
- सकारान्तः पुंलिङ्गः पुंस् शब्दः ।
- पुनाति इति पुमान् ।
- ‘पूञ् पवने’ ।
- पू (डुंसुन्) उंस् (‘पूञो डुंसुन्’ - ३)
- प् उंस् (‘टेः’ - ६.४.१४३)
- पुंस्

# ४३६. पुंसोऽसुङ् (७.१.८९)

- पदद्वयम् । पुंसः, असुङ् ।
- 'इतोऽत्सर्वनामस्थाने' (७.१.८६) इत्यतः 'सर्वनामस्थाने' इति अनुवर्तते ।
- सर्वनामस्थाने विवक्षिते पुंसः असुङ् स्यात् ।
- ङित्त्वादन्तादेशः ।
- असुङः उकारः उच्चारणार्थः ।
- 'बहुपुंसी' इत्यत्र 'उगितश्च' इति ङीबर्थं कृतेन 'पूञो डुंसुन्' इति प्रत्ययस्य उगित्त्वेनैव नुम्सिद्धेः ।

- पुंस्
- पुमस् ('पुंसोऽसुङ्' - ७.१.८९ इति सकारस्य असुङादेशः, निमित्तापायाद् अनुस्वारस्य निवृत्त्या मकारः)
- पुमस् (सुँ) स्
- पुमन् स् स् ('उगिदचां...' - ७.१.७०)
- पुमान् स् स् ('सान्तमहतः संयोगस्य' - ६.४.१०)
- पुमान् स् ('हल्ङ्याब्भ्यः..' - ६.१.६८)
- पुमान् ('संयोगान्तस्य लोपः' - ८.२.२३)

- हे पुमन्
- सम्बुद्धौ 'सान्तमहतः...' इति दीर्घो न प्रवर्तते ।

- पुमस्            ('पुंसोऽसुङ्' - ७.१.८९ इति सकारस्य असुङादेशः, निमित्तापायाद्      अनुस्वारस्य निवृत्त्या मकारः)
- पुमस् औ
- पुमन् स्   औ   ('उगिदचां...' - ७.१.७०)
- पुमान् स्   औ  ('सान्तमहतः संयोगस्य' - ६.४.१०)
- पुमांसौ         ('नश्चापदान्तस्य झलि' - ८.३.२४)

- पुमांसः ।
- पुमांसम्, पुमांसौ, पुंसः ।
- पुंसा, पुम्भ्याम्, पुम्भिः इत्यादि ।

- पुंस् भ्याम्
- पुम् भ्याम् ('संयोगान्तस्य लोपः' - ८.२.२३ - इति सस्य लोपः । निमित्तापायेन अनुस्वारनिवृत्त्या मकारः)
- पुं भ्याम् ('मोऽनुस्वारः' - ८.३.२३)
- पुम्भ्याम् ('अनुस्वारस्य ययि परसवर्णः' - ८.४.५८)

- पुंसि ।
- पुंसु ।

- पुंस् सु
- पुम् सु ।   (‘संयोगान्तस्य लोपः’ - ८.२.२३ - इति सस्य लोपः निमित्तापायेन अनुस्वारनिवृत्त्या मकारः)
- पुं सु   (‘मोऽनुस्वारः’ - ८.३.२३)

- सकारान्तः पुंलिङ्गः 'उशनस्' शब्दः ।
- 'ऋदुशनस्पुरुदंसोऽनेहसां च' (७.१.९४) इति अनङ् ।
- उशनस् (सुँ) स्
- उशनन् स् ('ऋदुशनस्...' - ७.१.९४ - इति सौ परे अनङ्)
- उशनान् स् ('सर्वनामस्थाने चासम्बुद्धौ' - ६.४.८ - इति उपधादीर्घः)
- उशनान् ('हल्ङ्याब्भ्यः...' - ६.१.६८)
- उशना ('नलोपः प्रातिपदिकान्तस्य' - ८.२.७)
- 'उशना भार्गवः कविः' (अमरः)
- उशनसौ, उशनसः ।

- ‘अस्य सम्बुद्धौ वाऽनङ् नलोपश्च वा वक्तव्यः’ ।
- हे उशनन्, हे उशन, हे उशनः ।

- उशनस् भ्याम्
- उशनर् भ्याम् (‘ससजुषो रुः’ - ८.२.६६)
- उशन उ भ्याम् (‘हशि च’ - ६.१.११४)
- उशनोभ्याम् (‘आद्गुणः’ - ६.१.८७)

- सकारान्तः पुंलिङ्गः अनेहस् शब्दः ।
- न हन्ति इति अनेहा ।
- अनेहा, अनेहसौ, अनेहसः ।
- हे अनेहः ।
- अनेहोभ्याम् इत्यादि ।

- सकारान्तः पुंलिङ्गः ‘वेधस्’ शब्दः ।
- ‘विधाञो वेध च’ इति उणादिसूत्रेण विपूर्वाद् धाञ्-धातोः असुन् प्रकृतेः वेधादेशश्च ।
- असुनि उकारः उच्चारणार्थः । उगित्त्वाभावात् न नुम् ।

- वेधस् (सुँ) स्
- वेधास् (‘अत्वसन्तस्य चाधातोः’ - ६.४.१४)
- वेधार् (‘ससजुषो रुः’ - ८.२.६६)
- वेधाः (‘खरवसानयोर्विसर्जनीयः’ - ८.३.१५)

- वेधसौ, वेधसः ।
- हे वेधः ।
- वेधोभ्याम् इत्यादि ।

- सकारान्तः पुंलिङ्गः ‘सुवस्’ शब्दः ।
- सुपूर्वाद् ‘वस आच्छादने’ धातोः क्विप् ।
- अधातोः इत्युक्तेः न दीर्घः ।
- सुष्ठु वस्ते सुवः, सुवसौ, सुवसः ।

- पिण्डं ग्रसते पिण्डग्रः, पिण्डग्लः ।
- ‘ग्रसु ग्लसु अदने’ ।

- सकारान्तः पुंलिङ्गः अदस्-शब्दः ।
- अदस्  (सुँ) स्

# ४३७. अदस औ सुलोपश्च (७.२.१०७)

- चत्वारि पदानि । अदसः, औ, सुलोपः, च ।
- 'तदोः सः सावनन्त्ययोः' (७.२.१०६) इत्यतः 'सौ' इति अनुवर्तते ।
- अदसः औकारः अन्तादेशः स्यात् सौ परे सुलोपश्च ।
- 'तदोः सः सौ..' इति दस्य सः ।
- अदस्   स्
- अद औ  स्   ('अदस औ सुलोपश्च' - ७.२.१०७)
- अद औ      ('अदस औ सुलोपश्च' - ७.२.१०७)
- अदौ       ('वृद्धिरेचि' - ६.१.८८)
- असौ       ('तदोः सः सावनन्त्ययोः'- ७.२.१०६)

- ‘औत्वप्रतिषेधः साकच्कस्य वा वक्तव्यः सादुत्वं च’ (वा) ।
- प्रतिषेधसंनियोगशिष्टम् उत्वं तदभावे न प्रवर्तते ।
- असकौ / असुकः ।

- त्यदाद्यत्वम्, पररूपम्, वृद्धिः ।
- ‘अदसोऽसेः...’ इति मत्वोत्वे ।
- अमू ।

- अदस्  औ
- अद अ औ  ('त्यदादीनामः' - ७.२.१०२)
- अद    औ    ('अतो गुणे' - ६.१.९७)
- अदौ    ('वृद्धिरेचि' - ६.१.८८)
- अमू    ('अदसोऽसेर्दादु दो मः' - ८.२.८०)

- अदस् (जस्) अस्
- अद अ अस्  (‘त्यदादीनामः’ - ७.२.१०२)
- अद अस्  (‘अतो गुणे’ - ६.१.९७)
- अद (शी) ई  (‘जसः शी’ - ७.१.१७)
- अदे  (‘आद्गुणः’ - ६.१.८७)

# ४३८. एत ईद्बहुवचने (८.२.८१)

- पदत्रयम् । एतः, ईत्, बहुवचने ।
- 'अदसोऽसेर्दादु दो मः' (८.२.८०) इत्यतः 'अदसः', 'दात्', 'दः', 'मः' इति अनुवर्तन्ते ।
- अदसो दात्परस्य एत ईत्स्याद् दस्य च मो बह्वर्थोक्तौ ।
- अमी ।

- ‘पूर्वत्रासिद्धम्’ इति विभक्तिकार्यं प्राक्, पश्चाद् उत्वमत्वे ।
- अमुम्, अमू, अमून् ।

- अद अम्
- अदम् (‘अमि पूर्वः’ - ६.१.१०७)
- अमुम् (‘अदसोऽसेः...’ - ८.२.८०)

- अद (शस्) अस्
- अदास्　　　('प्रथमयोः पूर्वसवर्णः' - ६.१.१०२)
- अदान्　　　('तस्माच्छसो नः पुंसि' - ६.१.१०३)
- अमून्　　　('अदसोऽसेः..' - ८.२.८०)

- मुत्वे कृते घिसंज्ञायां नाभावः ।
- अद (टा) आ
- अमु आ　　　('अदसोऽसेः..' - ८.२.८०)
- अमुना　　　('आङो नाऽस्त्रियाम्' - ७.३.१२०)

# ४३९. न मु ने (८.२.3)

- पदत्रयम् ।
- 'पूर्वत्रासिद्धम्' (८.२.१) इत्यतः 'असिद्धम्' इति अनुवर्तते ।
- नाभावे कर्तव्ये कृते च मुभावो न असिद्धः स्यात् ।
- अमुना ।

- अद भ्याम्
- अदाभ्याम्   ('सुपि च' - ७.३.१०२)
- अमूभ्याम्

- अद भिस्
- अदेभिः ('बहुवचने झल्येत्' - ७.३.१०३)
- अमीभिः ('एत ईद्बहुवचने' - ८.२.८१)

- अद (ङे) ए
- अदस्मै ('सर्वनाम्नः स्मै' - ७.१.१४)
- अमुस्मै ('अदसोऽसेः..' - ८.२.८०)
- अमुष्मै ('आदेशप्रत्यययोः' - ८.३.५९)
- अमीभ्यः ।

- अमुष्मात् ।
- अमुष्य ।

- अद ओस्
- अदे ओस्   ('ओसि च' - ७.३.१०४)
- अदयोः   ('एचोऽयवायावः' - ६.१.७८)
- अमुयोः   ('अदसोऽसेः...' - ८.२.८०)

- अद आम्
- अद साम्   (‘आमि सर्वनाम्नः सुट्’ - ७.१.५३)
- अदे साम्   (‘बहुवचने झल्येत्’ - ७.३.१०३)
- अमी साम्   (‘एत ईद्बहुवचने’ - ८.२.८१)
- अमीषाम्   (‘आदेशप्रत्यययोः’ - ८.३.५९)

- अमुष्मिन्, अमुयोः, अमीषु ।

# हलन्तस्त्रीलिङ्गप्रकरणम्

- हकारान्तः स्त्रीलिङ्गः ‘उपानह्’ शब्दः ।
- ४४०. नहो धः (८.२.३४)
- नहो हस्य धः स्यात् झलि पदान्ते च ।

- उपानह् स्
- उपानह् (‘हल्ङ्याब्भ्यः..’ - ६.१.६८)
- उपानध् (‘नहो धः’ - ८.२.३४)
- उपानद् (‘झलां जशोऽन्ते’ - ८.२.३९)
- उपानत् (‘वाऽवसाने’ - ८.४.५६)